श्रीमते रामानुजाय नमः

**श्री अनन्ताळ्.वान् अनुगृहीता**

# ॥ श्रीरामानुज चतुःश्लोकी ॥

अखिलात्म गुणावासं अज्ञान तिमिरापहम्।
आश्रितानां सुचरणं वन्दे अनन्तार्य देशिकम्॥

श्रीमद् रामानुजाचार्य श्रीपादाम्भोरुहद्वयम्।
सदुत्तमाङ्ग सन्तार्यं अनन्तार्यमहं भजे॥

अनिशं भजतां अनन्यभाजां
चरणाम्भोरुहमादरेण पुंसाम्।
वितरन् निभृतं विभूतिमिष्टां
जय रामानुज रङ्गधाम्नि नित्यम्॥ १

भुवि नो विमतांस्त्वदीय सूक्तिः
कुलिशीभूय कुदृष्टिभिस्समेतान्।
शकलीकुरुते विपक्षिवदीड्या
जय रामानुज शेषशैल शृङ्गे॥ २

श्रुतिषु स्मृतिषु प्रमाण तत्त्वं
कृपयाऽऽलोक्य विशुद्धया हि बुद्ध्या।
अकृथाः स्वत एव भाष्यरत्नं
जय रामानुज हस्तिधाम्नि नित्यम्॥ ३

जय मायिमतान्धकार भानो

श्रीमते रामानुजाय नमः

जय बाह्य प्रमुखाटवीकृशानो।
जय संश्रित सिन्धुशीत भानो
जय रामानुज यादवाद्रि शृङ्गे॥ ४

रामानुज चतुःश्लोकीम् यः पठेन्नियतः सदा।
प्राप्नुयात् परमां भक्तिं यतिराज पदाब्जयोः॥

**॥ इति श्रीरामानुज चतुःश्लोकी संपूर्णम्॥**